परित्यक्तः पार्थद्वेषाद्दुरात्मना। रूपवान् बलसम्पन्नो गुणवान् सत्यविक्रमः। इन्द्रलोकं जगामाशु श्रुत्वा तत्रार्जुनं गतम्। सोऽभिगम्य महाबाहुः पितरं सत्यविक्रमः। अभ्यवादयदव्यग्रो विनयेन कृताञ्जलिः। न्यवेदयत चात्मानमर्जुनस्य महात्मनः। इरावानस्मि भद्रं ते पुत्रश्चाहं तव प्रभो!। मातुः समागमो यश्च तत्सर्वं प्रत्यवेदयत्। तच्च सर्वं यथावृत्तमनुसस्मार पाण्डवः। परिष्वज्य सुतञ्चापि सोत्मनः सदृशं गुणैः। प्रीतिमानभवत् पार्थो देवराजनिवेशने। सोऽर्जुनेन समादिष्टो देवलोके तदा नृप!। प्रीतिपूर्वं महाबाहुः स्वकार्यं प्रति भारत। युद्धकाले त्वयास्माकं सह्यं देयमिति प्रभो। वाढमित्येवमुक्त्वा च युद्धकाल इहागतः"।

"इरावन्तं तु निहतं दृष्ट्वा पार्था महारथाः" भा०भी० ९२अ०। "पुत्रं विनिहतं श्रुत्वा इरावन्तं धनञ्जयः।" ९५ अ०। २नदीभेदे स्त्री ङीप्। भा० स०प०९अ० वरुणसभावर्णने। "इरावती वितस्ता च सिन्धुर्देवनदी तथा" "इरावत्यां हतो भोजः कार्त्तवीर्य्यसमो युधि" भा० व० १२अ० "शतद्रुकामहं तीर्त्वा तथा रम्यामिरावतीम्"। भा०क०४४ अ०। "इरावत्यां महाभोजावग्निसूर्य्यसमौ युधि" हरिवं० १६१। "इरावती धेनुमती हि भूतं" ऋ०७,९९,२। ४अन्नादियुक्ते त्रि० 'याशिष्टं वर्त्तिरश्विनाविरावत्" ऋ०७,४०५। "इरावत् हविरन्नादियुक्तम्" भा०। "सुन्दतावन्तः सुभगा इरावन्तोहतप्रमाः" अथ० ७,६०,६।

**इरावती** स्त्री इरां भूमिम् अवति अव-बा०अट ङीप्। वटपत्रीवृक्षे, सा हि पाषाणभेदनेनापि भूमिमाच्छादनात् पालयतीति तस्यास्तथात्वम्।

**इरिकावन** न० इरैव कन् अत इत्त्वम् इरिकाप्रधानं वनम्। क्षुभ्ना० "इरिकादीनि वनोत्तरपदानि संज्ञायाम्" पा० ग०सू० पाठात् न णत्वम्। जलप्रधाने वनभेदे। इरिकादीनि च "इरिका तिमिर समीर कुवेर हरि कर्म्मार"।

**इरिण** न० ऋ-इन किच्च। १ऊषरभूमौ, २निरालम्बे, ३शून्ये च। "यथा गौरो अपाकृतं तृष्यन्नेत्यवेरिणम्" ऋ०८,४,३। "यथेरिणे वीजमुप्त्वा न वप्ता लभते फलम्" मनुः।

**इरिन्** त्रि० इर-कण्ड्वा० णिनि यलोपः। १प्रेरके। "न येषामिरी सधस्थ ईष्ट आ" ऋ०५,८७,२। २ईर्ष्यके च।

**इरिमेद** पु० इरी रोगादीर्ष्यकः मेदोनिर्य्यासो यस्य। विट्खदिरे। "इरिमेदः कषायोष्णो मुखदन्तगदास्रजित्। हन्ति कण्डूविषश्लेष्मक्रिमिकुष्ठविषव्रणान्" भावप्र०।

**इरिविल्लिका** स्त्री इरिविल्लेव कन्। "पिड़काभिः समाकीर्णां दृढामुग्ररुजाज्वराम्। सर्व्वात्मिकां सर्व्वलिङ्गां जानीयादिरिविल्लिकामिति" निदानोक्ते मस्तकस्थे व्रणभेदे। कनभावे इरिविल्लाप्यत्र। "इरिविल्लां गन्धनाम्नीं कक्षां विस्फोटकास्तथा। पित्तजस्य विसर्पस्य क्रियया साधयेद्भिषक्" सुश्रु०।

**इरेश** पु० ६त०। १वरुणे, २वागीशे, ३भूमिपतौ, ४विष्णौ च

**इर्गल** न०स्त्री अर्गल+पृ०। द्वाररोधके काष्ठभेदे तस्मै हितम् अपूपादि० यत्। इर्गल्यः छ इर्गलीयः। तत्साधने वृक्षे।

**इर्य्य** त्रि० इर-कण्ड्वा० अच् वेदे नि० न यलोपदीर्घौ। प्रेरके। "यूयं राजानमिर्य्यं जनाय विभ्वतष्टम्" ऋ०५,५८,४।

**इर्वारु** स्त्री उर्व्व-आरु पृषो०। (काकुड़) १कर्कव्याम्। २हिंसके त्रि०। "सिंहव्याघ्रवृकतरक्षुऋक्षद्वीपिमार्ज्जारशृगालमृगेर्व्वारुकप्रभृतयो गुहाशयाः" सुश्रुतः। मृगेर्वारुकः मृगहिंसकः। आलु। इर्व्वालुरप्युक्तार्थे।

**इर्वारु(लु)शुक्तिका** स्त्री इर्वारुः(लुः) शुक्तिकेव स्वयंस्फोटनात्। (फुटी) (स्वयं भिन्नविपक्वकर्कव्याम्)।

**इल** शयने अक० गतौ क्षेपे च सक०तुदा०पर०सेट्। इलति। ऐलीत् इयेल ईलतुः इलितः इलः।

**इल** क्षेपणे चुरा०उभ०सक० सेट्। एलयति ते ऐलिलत् त। ऐलयीत् ऐलिष्ट "कथं वातमेलयति कथं न रमते मनः" अथ०१०,७,३१। "आसां देवतानां यांयां कामयते सा भूत्वेलयति" शत०ब्रा० १०,२,८,८।

**इलविला** स्त्री पुलस्त्यमुनिपत्न्याम् कुवेरजनन्याम्। एतत्सम्बन्धेनैव कुवेरस्य ऐलविल इति नाम।

**इला** स्त्री इल-क। १भूमौ, २गवि, ३वाचि, ४जम्बुद्वीपस्थनववर्षमध्ये वर्षभेदे तत्सीमा चेलावृतशब्दार्थे वक्ष्यते। ५ वैवस्वतमनुकन्यायां बुधपत्न्याम्। सा हि विष्णुवरात् पुंस्त्वमासाद्य पुनः शङ्करशापात् स्त्रीत्वं गता बुधस्तु तामुपगम्य पुरूरवसमुत्पादयामासेति पुराणे प्रसिद्धम्। तच्च इडाशब्दे उक्तप्रायम् ६ स्वप्नशीले त्रि०।

**इ(ए)ला** कण्ड्वा० यक् प० अक० सेट्। इ(ए)लायति।

**इलावृत** न० इला पृथिवीवावृतं निषधादिभिः। नववर्षात्मकजम्बुद्वीपस्थ वर्षभेदे तच्च वर्षम् "पश्चान्माल्यवतः, प्राच्यां गन्धमादनशैलतः। इलावृतं नीलगिरेर्याम्यतो, निषधादुदक्" इत्युक्त चतुःसीमावच्छिन्ने देशेऽस्ति। "माल्यवांश्च